# ८.५ कस्मै ? कस्यै ?



कन्या आपणिकाय धनं यच्छति ।




यूयं पठनाय विद्यालयं गच्छथ ।



छात्राः शिक्षिकायै पुष्पाणि यच्छन्ति ।



आचार्याय नमः ।



शिक्षिकायै नमः ।



जनन्यै नमः ।

## भाषाभ्यासः

### १. वाक्यानि पूरयत ।

१. ________ (गणेश) नमः ।

२. ________ (सरस्वती) नमः ।

३. सः ________ (बाल) लड्डुकं यच्छति ।

४. ते ________ (भोजन) उपाहारगृहं गच्छन्ति ।

५. वयं ________ (वृद्धा) पुष्पाणि यच्छामः ।

६. त्वं ________ (मित्र) लेखनीं यच्छसि ।

### २. महिला कस्मै किं यच्छति? इति लिखत ।

| | | | |
|---|---|---|---|
| महिला | (बालक)<br>(बालिका)<br>(भिक्षुक)<br>(सेविका)<br>(मातामही)<br>(आपणिक) | मोदकं<br>कूपीं<br>वस्त्रं<br>धनं<br>प्रातराशं<br>नाणकं | यच्छति । |

### ३. किमर्थं कुत्र गच्छति? इति लिखत ।

| | | | |
|---|---|---|---|
| बालकः | (पठन)<br>(वाचन)<br>(व्यायाम)<br>(वस्तुक्रयण)<br>(पूजन)<br>(खादन) | शालां<br>ग्रन्थालयं<br>व्यायामशालां<br>आपणं<br>मन्दिरं<br>उपाहारगृहं | गच्छति । |